शोध-शीर्षकः

लौगाक्षिभास्करविरचितायाः तर्ककौमुद्याः विश्लेषणात्मकम् अध्ययनम्

राँचीविश्वविद्यालये संस्कृतविभागे विद्यावारिधि(Ph.D)इत्युपाधिप्राप्तये
प्रस्तावितः शोधविषयः

मानविकी-संकायः

शोधनिर्देशिका -

डॉ निमिषा कुमारी.

अतिस्टेंट प्रोफेसर , संस्कृत विभागः ,

डोरंडा महाविद्यालयः , राँची.

गवेषकः

मोहन-जाना

प्रस्तावना

भारतीयमनीषायां दुःखमयं संसारम्। कस्मात् दुःखमागच्छति ?तत् केनोपायेन निरोधयिष्यति मानवा अवश्यमेव विचार्यं कुर्य्युः। दुःखमेव जीवनस्याङ्गमेतस्मात् कारणात् दार्शनिका एतस्मिन् विषये विचार्यं कुर्वन्ति।

सुप्राचीनकालात् भारतवर्षे दर्शनचर्चां परिलक्ष्यति । ऋग्वेदे दशममण्डले पुरुषसूक्ते , नासदीयसूक्ते , हिरण्यगर्भसूक्ते, देवीसूक्ते ज्ञानसूक्ते च दार्शनिकतत्त्वेन समृद्धम् । तस्य प्रमाणम् -

हिरण्यगर्भ: समवर्तताग्रे भूतस्य जात: पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

पुरुष एवेदं सर्वं यद्भूतम् यच्च भव्यम्।
उतामृतत्वस्येशानो यदन्नेनाऽतिरोहति॥

अथर्ववेदसंहितायां कालसूक्ते परमं दार्शनिकतत्त्वं निहितम् । काल एव कलयिता सर्वस्य जगतः अनवच्छिन्नकालरूपः परमेश्वरः । तस्य प्रमाणम् -

पूर्णः कुम्भोत्धि काल आहितस्तं वै पश्यामो वहुधानु सन्तः ।
स ईमा विश्वा भुवनानि प्रत्यङ्कालं तमाहुःपरमेव्योमन । ।

उपनिषदि केनोपायेन दुःखं निवृत्तिं सम्भवति तत् विस्तारेणालोचितवान्। तस्य प्रमाणम् -

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।।

सर्वाजीवे सर्वसंस्थे वृहन्ते अस्मिन् हंसो भ्राम्यते व्रह्मचक्रे।
पृथागात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।।

श्रीमदभगवद्गीतायां सतासतयोः पदार्थयोः स्थायित्वेन दार्शनिकतत्त्वं आलोचितम्-

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टो न्तस्त्वनयोस्तत्त्वदर्शिभिः ।।

दृश् धातोः ल्युट् प्रत्ययेन दर्शनमिति पदं निष्पन्नम् । भारतीयमनीषायां सुप्राचीनकालात् दार्शनिकतत्त्वं पर्यालोचितम् । पूर्वे मया आलोच्यते।

वेदस्य प्रामाण्याप्रामाण्यत्वेन भारतीयदार्शनिकसम्प्रदायेषु आस्तिकनास्तिकौ द्वौ विभागौ स्तः। भारतीयदार्शनिकसम्प्रदायेषु ये वेदं प्रमाणरूपेण स्वीक्रियन्ति ते आस्तिकाः ये न स्वीक्रियन्ति तेः नास्तिकाः। मनुसंहितायां महर्षिना मनुना प्रक्तोम्- **"नास्तिको वेदनिन्दकः"(२\११)।** अष्टाध्याय्यां भिन्नरूपेन महर्षिना पाणिनिना प्रोक्तम्-"**अस्तिनास्तिदिष्टं मतिः"(४.४.६०)**। चार्वकवौद्धजैनाः नास्तिकदर्शनानि तथा सांख्या-योग-न्याय-वैशेषिक-मीमांसा-वेदान्ताः आस्तिकदर्शनानि ।

न्यायदर्शनस्य इतिवृत्तः

षडास्तिकदर्शनेषु न्यायदर्शनमन्यतमम्।"**नियते विवक्षितार्थः अनेन इति न्यायः"** वयं येनोपायेन ज्ञेयतत्त्वं निकषागच्छमः स एव न्यायः। वात्स्यायननये- **"प्रमाणैरर्थपरीक्षणं न्यायः"**। न्यायशास्त्रस्य विभिन्नानि नामानि एव प्रमाणशास्त्र-तर्कशास्त्र-वादविवादान्वीक्षिकि -हेतुविद्याः । कौटिल्यनये सर्वविद्यासु प्रदीपस्वरूपं न्यायशास्त्रम् । तस्य प्रमाणम् -

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ।।

महर्षिगौतमेन विरचितं न्यायसूत्रमधिकृत्य न्यायदर्शनं विस्तृतवत्। कालान्तरे न्यायदर्शनं द्विधा विभाज्यते प्रचीननव्यन्यायभेदात्। न्यायसूत्रमधिकृत्य प्रचीनन्यायशास्त्रस्य ग्रन्थानि रचितानि।

तानि एव वात्स्यायनमुनेः वात्स्यायनभाष्यम् , वात्स्यायनभाष्यस्योपरि उद्योतकरमहोदयस्य न्यायवार्त्तिकम्,न्यायवार्त्तिकस्योपरि सर्वतन्त्रस्वतन्त्रस्य वाचस्पतिमिश्स्य न्यायवार्त्तिकतात्पर्यटीका,तात्पर्यटीकायाः उपरि उदयनाचार्यस्य तात्पर्यपरिशुद्धिः,तात्पर्यपरिशुद्धेः उपरि गंगेशोपाध्यायस्य पुत्रः वर्धमानोपाध्यायः प्रकाशटीकाम् ,प्रकाशटीकायाः उपरि रुचिदत्तस्य मकरन्दटीका, जयन्तभट्टस्य न्यायमञ्जरी, उदयनाचार्यस्य न्यायकुसुमाञ्जलिश्चेति।मिथिलाप्रदेशे प्रचीनन्यायशास्त्रस्य पीठस्थानम्।

न्यायसूत्रेषु प्रमाणसूत्राणामुपरि गङ्गेशोपध्यायेन तत्त्वचिन्तामणिः विरचितः।तत्त्वचिन्तामणिमधिकृत्य नव्यन्यायदर्शनं विस्तृतम् ।

तत्त्वचिन्तामणेः उपरि मथुरानाथतर्कवागीशः माथुरीटीका रघुनाथशिरोमणिः दीधितिटीका च रचितवन्तः। दीधितिटीकायाः उपरि जगदीशस्य जागदीशि तथा गदाधरस्य गादाधरीटीकादि नव्यन्यायदर्शने संयुज्यन्ते।वङ्गदेशे नवद्विपे नव्यन्यायदर्शनस्य पीठस्थानमासीत्।

वैशेषिकदर्शनस्य इतिवृत्तः

वैशेषिकसूत्रमधिकृत्य वैशेषिकदर्शनं विस्तृतवत्।महर्षिकनादेन वैशेषिकसूत्रं विरचितम्। महर्षिकनादस्य नामान्तरः उलुकः।महाभारते तस्य प्रमाणम्-" उलुकः परमो विप्रो मार्कण्डेयो महामुनिः"(।वैशेषिकसूत्रमधिकृत्य प्रशस्तपादाचार्येण पशस्तपादभाष्यं रचितम्।पशस्तपादभाष्यस्योपरि किरणावली, न्यायकन्दली,न्यायलीलावती,सप्तपदार्थीदिश्च ग्रन्थानि रचितानि।

प्रकरणशब्दस्य विश्लेषणम्

मूलग्रन्थस्याववोधनार्थं प्रकरणग्रन्थस्य पाठं करणीयम्।प्रकरणग्रन्थस्य लक्षणप्रसङ्गे पराशरोपपुराणयुक्तम्-

शास्त्रैकदेशसम्वद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः।।

न्यायवैशेषिकदर्शनेषु वहवः प्रकरणानि ग्रन्थानि सन्ति। तेषु केशवमिश्रस्य तर्कभाषा, अन्नम्भट्टस्य तर्कसंग्रहः,विश्वनाथन्यायपञ्चाननस्य भाषापरिच्छेदः, जगदीशस्य तर्कामृतं लौगाक्षिभास्करस्य तर्ककौमुदी च प्रसिद्धं लभन्ते।

लौगाक्षीभास्करस्य परिचयः

भाट्टसम्प्रदायेषु लौगाक्षीभास्करोऽन्यतमः। तस्य पिता मुद्गलः पितामहः रुद्रश्च आस्ताम् । तस्य प्रमाणम् - कीथ नये - "the author was son of Mudgal and grand son of the poet rudra " । भारतीयपण्डितानां नये कवे रुद्रस्य भ्रातुष्पुत्रः भास्करः।क्वचित् पण्डितानां नये १७ ईशवीयावब्दे भास्करेण जातः ।भास्करः विष्णोः उपासकं आसीत्।

ग्रन्थस्य नामकरणम्

तर्ककौमुदी इति नाम ग्रन्थकारेण ग्रन्थस्य अकरोत्।तर्काणां कौमुदी इति षष्ठी तत्पुरुषसमासः । तर्क्यन्ते प्रतिपाद्यन्ते इति तर्का द्रव्यादिसप्तपदार्थाः (तर्कसंग्रहदीपिका)। कौमुदी शब्दस्यार्थं चन्द्रः।अर्थात् यो ग्रन्थः सप्तपदार्थवर्णने चन्द्रसदृशं स एव तर्ककौमदी।

शोधस्योद्देश्यः

१. लौगाक्षिभास्करस्य नये सप्तपदार्थाणां विश्लेषणात्मकाध्ययनं मुख्यलक्षम्।

२.लौगाक्षिभास्करस्य नये प्रमाणविषये विभिन्नानां दर्शनानां मतानां एकमध्ययनम्।

३.दोषत्रयस्य एकमध्ययनम्।

विषयपर्यालोचनम्

ग्रन्थकारेण शिष्टाचारत्वात् श्लोकद्वयेन मङ्गलाचरणम् कृतम्। प्रथमश्लोके भगवतं विष्णुं नमस्करोति। द्वितीयश्लोके अक्षपादं कणादं नमस्कृत्य तर्ककौमुदी विरचिता। तर्ककौमुदी इत्यत्र तर्कानां कौमुदी अत्र तर्का शब्देन द्रव्यादिसप्तपदार्था वोद्धव्याः।

पदार्थाणामुद्देशम्

"तत्राभिधेयाः पदार्थाः। ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तैवः"।ग्रन्थकारेण ग्रन्थस्य प्रारम्भे पदार्थस्य स्वरूपं प्रदर्शितं - तत्राभिधेयेति । वयं येभ्य वस्तुभ्यः संज्ञां यच्छामः ते एव पदार्थाः। यथा घटपटादिः । अभिधेयत्वं पदार्थस्य सामान्यलक्षणम्। प्रशस्तपादाचार्येणोक्तम्-"षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि" । पदार्थान् विभजते द्रव्यगुणादीति। अत्र ग्रन्थकारेण सप्तपदर्थाः स्वीकृताः। ते च द्रव्यं ,गुणः,कर्म,सामान्यं ,समवायः,अभावः । ग्रनथकारेण सप्तपदार्थेषु प्रथमपदार्थस्य द्रव्यस्य नवैवः विभागः ग्रन्थकारः स्वीकरोति । ते च पृथिवी,तेजः ,वायुः,आकाशः, कालः,दिक्, आत्मा,मनः नवैव।द्वितीयपदार्थस्य गुणस्य चतुर्विंशतिः विभागः स्वीकरोति।ते च

रूपम्,रसः,गन्धः,स्पर्शः, संख्या,परिमाणम्,,पृथकत्वम्, संयोगः,विभागः,परत्वम्, वुद्धिः,सुखम्, दुःखम् ,इच्छा,द्वेषः,प्रयत्नः,गुरूत्वम् ,द्रवत्वम् ,स्नेह ,

संस्कारः ,धर्मः,अधर्मः, शब्दः ।कर्मणः पञ्चविधत्वं स्वीकरोति। ते च उत्क्षेपणम् ,अपक्षेपणम् , आकुञ्चनम् , प्रसारणम् , गमनम् ।सामान्यपदार्थस्य परमपरं भेदेन द्विविधत्वं स्वीकरोति।अनन्तरूपेन विशेषपदार्थं स्वीकरोति। समवायः एकः । अभावः द्विविधः संसर्गाभावःअन्योन्याभावश्चेति। अनन्तर ग्रन्थकारेण प्रत्येकस्य पदार्थस्य सामान्यलक्षणं प्रदर्शितम्।

पदार्थस्य सामान्यलक्षणपर्यालोचनम्

द्रव्यस्य सामान्यलक्षणं करोति -"**द्रव्यत्वसामान्यवद्गुणवद्वा द्रव्यम्** "। यस्मिन् पदार्थे द्रवत्वसामान्यं गुणयुक्तं वा भवति, स एव पदार्थः द्रव्यम् ।अन्नंभट्टेन तर्कसंग्रहदीपिकाटीकायां उक्तम् - "**द्रवत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम्"।** ग्रन्थकारेण गुणस्य लक्षणप्रसङ्गे उक्तम्-" **गुणत्वसामान्यवान्द्रव्यकर्मभिन्नः सामान्यवान्वा गुणः"।तर्कसंग्रहदीपिका १.**

सामान्यपदार्थस्याश्रयं भवति द्रव्ये, गुणे,कर्मणि च। द्रव्यकर्मभिन्नत्वे सति गुणाश्रयत्वं सामान्यं गुणस्य लक्षणम्।कर्मणः लक्षणप्रसङ्गे उक्तम्- कर्मत्वसामान्यवञ्चलनात्मकं वा कर्म।यस्मिन् पदार्थे कर्मत्वं तथा चलनात्मकत्वं भवति सः पदार्थः कर्मेत्युच्यते।ग्रन्थकारः सामान्यस्य लक्षणं करोति- "**नित्यमेकमनेकसमवेतं सामान्यम्**"।अर्थात् यः पदार्थः उत्तपत्तिविनाशरहितत्त्वे सति एकत्वे सति अनेकानुगतत्वं सः एव समान्यपदार्थस्य लक्षणम्। विशेषपदार्थस्य लक्षणप्रसङ्गे उक्तम्-"**अयस्माद्यावृत्त इति व्यावृत्तिबुद्धिमात्रहेतुर्विशेषः"।**

समवायस्य लक्षणप्रसङ्गे उक्तम्-नित्यसम्बन्धः समवायः।अयुतसिद्धसम्बन्धः एव समवायः।किमयुतसिद्ध ? एतत् प्रसङ्गे तर्कसंग्रहकारेणोक्तम्-"ययो द्वयोः मध्ये एकम् अविनश्यद् अपराश्रितम् एव अवतिष्टते तौ अयुतसिद्धौ।अभाव पदार्थस्य लक्षणप्रसङ्गे उक्तम्-भावभिन्नोऽभावः।द्रव्यगुणकर्मसामान्यविशेषसमवायाः एषाः पदार्थाः भिन्नः पदार्थः अभावः। इति द्रव्यादिसामान्यलक्षणानि।

विशेषलक्षणपर्यालोचनम्

पदार्थेषु प्रथमपदार्थं द्रव्यम्। ग्रन्थकारः द्रव्यस्य नवैव विभागः स्वीकरोति।ते यथा पृथिवी,तेजः ,वायुः,आकाशः, कालः,दिक्, आत्मा,मनश्च। क्रमानुसारेण प्रत्येकस्य द्रव्यस्य लक्षणमकरोत्।तत्र प्रारम्भे लक्षणप्रसङ्गे उच्यते-पृथिवीत्वसामान्यवतीपृथिवी।रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारात्मकचतुर्दशगुणवती"।नित्यानित्या च भेदेन द्विधा विभज्यते।नित्या परमाणुलक्षणा तथा अनित्या कार्यलक्षणा।पुनः अनित्या त्रिविधा शरीरेन्द्रियविषयभेदे।एवं प्रकारेण ग्रन्थकारेण अप्तेजोवाय्वाकाशकालदिगात्मामनांसि द्रव्याणि विषये आलोचितम्।

पदार्थेषु द्वीतियः पदार्थः गुणः। लौगिक्षीभास्करमहोदयेन चतुर्विंशतिः गुणाः स्वीकृताः।अत्र ग्रन्थकारेण गुणस्य विशेषलक्षणं पर्यालोचितम्।चतुर्विंशतिगुणेषु एकः गुणः वुद्धिः तस्यालोचनावसरे ग्रनथकारेण प्रमाप्रमा,करणम्, प्रमाणञ्च विषये सविस्तारेण आलोचितम्।

पदार्थेषु तृतीयः पदार्थः कर्म।ग्रनथकारेण पञ्चविधं कर्म क्रमानुसारेण आलोच्यते।अनन्तरं द्विविधं सामान्यं सविस्तारेण आलोच्यते।विशेषसमवाययोः एकत्र आलोच्यते।अभावपदार्थस्य विषये ग्रन्थकारः पूर्वे द्विविधः स्वीकृतवान्।

ते यथा -संसर्गाभावोऽन्योन्याभावश्चेति।पुनः संसर्गाभावः त्रिविधत्वं स्वीकृतम्। ते यथा प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति।क्रमानुसारेण आभावपदार्थस्य लक्षणं स्वीकृतम्।अनन्तरं अव्याप्तिः अतिव्याप्तिः असंभवश्च दोषाणां लक्षणान्यकरोत्।अन्ते उद्देशः, लक्षणम् , परीक्षा मोक्षश्च स्वरूपं वर्णयन्ति।

अध्यायविभाजनम्

प्रथमोऽध्यायःभारतीयदर्शनस्यस्वरूपवैशिष्ट्यश्च

(i)भारतीयदर्शनस्योद्भवः

(ii)भारतीयदर्शनस्य विभागः

द्वितीयोऽध्यायःपदार्थाणामुद्देशम्

(i)पदार्थस्य विभागः

(ii)पदार्थाणां सामान्यलक्षणपर्यालोचनम्

तृतीयोऽध्यायःद्रव्यनिरूपणम्

(i)द्रव्यस्य विभागः

(ii)द्रव्यणां विशेषलक्षणपर्यालोचनम्

चतुर्थोऽध्यायःगुणनिरुपणम्

(i)गुणस्य विभागः

(ii)गुणानां विशेषलक्षणपर्यालोचनम्

पञ्चमोऽध्यायःकर्मसामान्यञ्च निरूपणम्

(i)कर्मणः विभागः

(ii)कर्मणां विशेषलक्षणपर्यालोचनम्

(iii)सामान्यस्य विभागः

(iv)सामान्यानां विशेषलक्षणपर्यालोचनम्

षष्ठोऽध्यायःविशेषसमवायाभावश्च निरूपणम्

(i)विशेषस्य विभागः तस्य स्वरूपनिरुपणम्

(ii)समवायस्य विभागः तस्य स्वरूपनिरुपणम्

(iii)अभावस्य विभागः तस्य स्वरूपनिरूपणम्

सहायकग्रन्थसूची

१. तर्कसंग्रह - यदुपति त्रिपाठी, वि एन पाव्लिकेशन, नवम संस्करण२०१६

२. तर्ककौमुदी-वजवल्लभ द्विवेदी ,निर्णयसागर,पञ्चम संस्करण

३.उपनिषद्-गीताप्रेस,गोरक्षपुर

४.तर्कभाषा- डॉ अनामिका रायचौधुरी, संस्कृत वुक डिपो, द्वितीय संस्करण २०१८

५.तर्कभाषा - प्रोफ़ेसर शर्वाणी गाङ्गुली , संस्कृत पुस्तक भाण्डार, प्रथम संस्करण २००५

६.प्रशस्तपादभाष्यम् - ब्रह्मचारी मेधाचैतन्य दण्डिस्वामी दामोदर आश्रम, संस्कृत वुक डिपो ,प्रथम प्रकाशा

७.सप्तपदार्थी - डॉ जय भट्टाचार्य्य, रामकृष्ञ मिशन इनस्टिटिउट अव कालश्चारस्तथैव , द्वितीय संस्करण२०२१

७.अर्थशास्त्र- डॉ मानवेन्दु वन्दोपाध्याय , श्री अशोककुमार वन्दोपाध्याय, सदेश ,पञ्चम संस्करण

८.वैदिक पाठ संकलन- श्रमती शान्ति वन्दोपाध्याय , सदेश ,

९.भाषापरिच्छेद- श्रीगुरुनाथ विद्यानिधि, सदेश, प्रथम प्रकाश

१०.न्यायदर्शन- फणिभूषण तर्कवागीश, पश्चिमवङ्ग राज्य पुस्तक पर्षत् , षष्ठ प्रकाश२०१८

११.तर्कसंग्रह- आचार्य केदारनाथ त्रिपाठी,मोतिलाल बनारसीदास, संस्करण २००४

१२.भारतीय दर्शन- डा विपद्भञ्जन पाल ,संस्कृत पुस्तक भाण्डार, प्रथम प्रकाश २०१४

१३.भारतीय दर्शन-प्रद्योत कुमार मण्डल ,प्रग्रेसिभ पावलिशार्स,संस्करण १९९९

१४. भारतीय दर्शन परिचय- यदुपति त्रिपाठी, वि एन पाव्लिकेशन, अष्टम संस्करण २०१५

१५.श्रोतपाठ-शुक्ला सेन ,संस्कृत वुक डिपो,संस्करण २००८

१६.अर्थसंग्रहः - स्वामी भर्गानन्द ,संस्कृत पुस्तक भाण्डार, प्रथम प्रकाश १४११ वङ्गाब्द

....